**2.2.1 संस्थान प्रवेश के बाद छात्रों के सीखने के स्तर का आकलन करता है और विशेष कार्यक्रम (भ्रमण कार्यक्रम/गुरुकुल/मौखिक संस्कृत शिविर/शिविर/कार्यशाला/विज्ञान प्रशंसा/कर्मकांड कार्यक्रम/संचार (मौखिक और लिखित) कार्यशालाएं/सांस्कृतिक संग्रहालय दौरे सहित) आयोजित करता है। उन्नत शिक्षार्थियों और धीमी गति से सीखने वालों के लिए पांडुलिपि पुस्तकालय/ग्रीष्मकालीन विद्यालय आदि)।**

***The Institution assesses the learning levels of the students, after admission and organises special programmes (including Tour programs/ Gurukulas/ spoken Sanskrit shibirams/ camps/ workshops/ Science Appreciation/ Program of Karmakanda/ Communication (Oral and written) workshops/ Cultural musuem visits and manuscript liabraries/ summer schools etc.) for advanced learners and slow learners.***

---

सम्पूर्णानन्दसंस्कृतविश्वविद्यालये संस्कृतप्रमाणपत्रीयस्तरे विदेशीभाषाडिप्लोमा, पुरातत्त्व संग्रहालयविज्ञानस्तरे, पत्रकारिता एवं जनसञ्चारविज्ञानस्नातकोत्तरस्तरे, ग्रन्थालय एवं सूचनाविज्ञानस्तरे, स्नातकोत्तरभाषाविज्ञानप्रमाणपत्रीय-विदेशीभाषा-उच्चतर डिप्लोमा-अनुवादस्तरे, शिक्षाशास्त्रियस्तरे, शास्त्रिस्तरे, आचार्यस्तरे, विद्यावारिधिस्तरे, विभिन्नवर्गीयाः छात्राः प्रविशन्ति। प्रवेशसमये अधिगमस्तरोऽपि भिन्नः-भिन्नः कल्प्यते। विश्वविद्यालये नामाङ्कितानां छात्राणाम् अधिगमस्तरस्य अधिगन्तृ छात्राणां श्रेणीभेदात् मानिकअभिगमप्रणाली विद्यते। अतः अयं विश्वविद्यालयः नानाविध-सामाजिक-आर्थिक-विभिन्नपृष्ठभूमियुतानां छात्राणाम् आवश्यकताः परिपूरयितुं नैकप्रकारान् विशिष्टान् उपायान् कल्पयति। अध्यापकैः विभिन्नकक्षासु शास्त्रार्थसभासु च एवं, विभिन्नशैक्षिककार्यक्रमेषु वार्षिक-अधिसत्रपरीक्षासु च छात्राणां मूल्याङ्कनं क्रियते येन विशेषबोधयुक्तानां छात्राणाञ्च अभिज्ञानं वर्धते। प्रगताध्येतृणां, सामान्याध्येतृणां च अधोदत्तां प्रक्रियां आधारिकृत्य इयं व्यवस्था विश्वविद्यालयेन संचाल्यते -

1. शास्त्रि-आचार्यकक्षासु नामाङ्कितानां छात्राणाम् अगामिकक्षासु योग्यतानिर्धारणं गृहीतपरीक्षायाः परिणामस्य आधारेण विधीयते।
2. शास्त्रिद्वितीयतृतीयवर्षे आचार्यप्रथम-द्वितीय-तृतीयाधिसत्रे च विश्वविद्यालयस्तरीयमूल्याङ्कनेनं सह तेषां छात्राणां बौद्धिकस्तरस्य सत्रान्तपरीक्षायाः परिणामस्य आधारेण निर्धारणं भवति।
3. विद्यावारिधिछात्राणां प्रगति-आख्या (प्रगतिरिपोर्ट) द्वारा बौद्धिकस्तरस्य निर्धारणं तथा च विश्वविद्यालय अनुदान आयोग छात्रवृत्तिप्राप्तानां शोधछात्राणां कनिष्ठाध्येतृवृत्तितः वरिष्ठाध्येतृवृत्तौ प्रवेशनिर्धारणं क्रियते।

शास्त्रिकक्षायाः प्रथमाधिसत्रे प्रवेशात् प्राक् छात्राणाम् अर्हतानिर्धारणं विश्वविद्यालयद्वारा विधीयते। तत्र उत्तरमध्यमायां व्याकरणस्य छात्राः व्याकरणविभागे आहोस्ति् अन्यस्मिन् विभागे शास्त्रिप्रथमासत्रे प्रवेशार्हाः भवन्ति। किन्तु उत्तरमध्यमायां व्याकरणेतरविषयमादाय उत्तीर्णाः छात्राः

व्याकरणविभागे शस्त्रिस्तरीयपाठ्यक्रमे प्रवेशार्हाः न भवन्ति। इत्थं ज्योतिषविभागे, न्यायविभागे, वेदविभागे च प्रवेशार्हता निर्धारिता विद्यते। आचार्यप्रथमाधिसत्रेऽपि छात्राणां प्रवेशार्थम् अर्हताकलनं निर्धारितं विद्यते। तत्र व्याककरण न्याय, ज्योतिषवेदविषयमाश्रित्य उत्तीर्णवतां छात्राणाम् आचार्यप्रथमाधिसत्रे प्रवेशार्हता विश्वविद्यालयेन अनुमता विद्यते। विद्यावारिधिपाठ्यक्रमे प्रवेशाय छात्राणां लिखितपरीक्षा आयोज्यते। तत्र लिखितपरीक्षायाम् उत्तीर्णा एव छात्राः पञ्जीकृताः भवन्ति। पुनश्च तेषां पञ्जीकृतानां छात्राणां षाण्मासिकपाठ्यक्रमाध्ययनान्तरं सम्बद्धपरीक्षोत्तीर्णाः छात्राः शोधकार्ययोग्याः भवन्ति। विद्यावाचस्पतिपाठ्यक्रमे प्रवेशार्थं पूर्वं गवेषात्मकस्य निबन्धस्य परीक्षणं भवति। तदनन्तरं योग्यतामाकलय्य विद्यावाचस्पतिपाठ्यक्रमे पञ्जीकृताः भवन्ति।

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य द्वाविंशतिसंख्याक विभागेषु साधारणछात्राणां, असाधारणछात्राणाञ्च कृते अध्यापकाः अध्यापनकाले सावधानाः भूत्वा अध्यापनकार्यं कुर्वन्ति। प्रायः विभागेषु साधारणछात्राः असाधारणछात्राश्च समुपलभ्यन्ते। असाधारणछात्राः अल्पेसमये पाठं ग्रहीतुं भवन्ति किन्तु साधरणछात्राः तथा न भवन्ति। अतः तेषां साधारणछात्राणां कृते निर्धारितसमयातिरिक्तसमयेऽपि अध्यापकाः अध्यापनकार्यं कुर्वन्ति। सहैव परिवेशसम्बद्धशब्दैः पाठ्यक्रमं सुगमं विधाय ग्रन्थाभ्यासः क्रियते। तेषां साधरणछात्राणां कृते पाठितपाठ्यक्रमस्य पुनरभ्यासाय समयं दत्त्वा पाठः पाठ्यते।

विशेषतः साधारणछात्राणां कृते अधिगमस्तरं वर्धयितुं नैके प्रकल्पाः विश्वविद्यालयद्वारा समायोज्यन्ते। विवरणम् –

| क्रम संख्या | कार्यक्रमाः | कार्यम् |
|---|---|---|
| 1. | संस्कृतभाषादक्षतायैः शिविरायोजनम् | साप्ताहिकं, मासिकञ्च |
| 2. | शास्त्रप्रशिक्षणकार्यशाला | साप्ताहिकी, मासिकी |
| 3. | पौरोहित्यप्रशिक्षणम् | वार्षिकम् |
| 4. | कर्मकाण्ड प्रशिक्षणम् | वार्षिकम् |
| 5. | प्रौढ़शास्त्राध्ययनम् | शास्त्रप्रौढिद्वारा |
| 6. | भाषाकौशलविकासः | वाग्वर्धिनीसभाद्वारा |
| 7. | साधारणासाधारणछात्राणां समितिः | विभागस्तरीयगठनद्वारा |

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य सर्वे मुख्यपाठ्यक्रमाः शास्त्रीयसंस्कृताधारिताः वर्त्तन्ते। तेषां पाठ्यक्रमाणां सुगमपूर्वकम् अवबोधनाय साक्षात्कारेषु स्वाभिव्यक्तिप्रदर्शनाय च संस्कृतभाषा छात्राणां कृते ज्ञानं

अनिवार्यमिति मत्वा संस्कृतभाषासम्भाषणदक्षतायै विभागस्तरीयं सम्भाषणशिविरं समायोज्यते। आयोजिते शिविरे प्रशिक्षकैः साधारणछात्राणां कृते विशेषभाषाशिक्षणाभ्यासः विधीयते। तत्र असाधारणछात्राणां प्रवाहः व्याकुपितो न भवेतिति तदपि मनसि निधाय अधिगमस्तरानुगुणं शैलीम् अङ्गीकृत्य भाषाभ्यासः विधीयते। यद्यपि ऋषिप्रणीतेषु शास्त्रेषु परिभाषिकशब्दानां बाहुल्यात् झटिति शास्त्रावबोधे काठिन्यं समायाति तत् अपाकर्तुं विश्वविद्यालयस्य अध्यापकैः, तथा अन्यविश्वविद्यालयात् समाहूतैः विद्यावैभवविचक्षणैः पण्डितैश्च शास्त्रप्रशिक्षणकार्यशालाः काले काले विश्वविद्यालयद्वारा व्यवस्थाप्यते।

शास्त्रगूढार्थावबोधने समागतपारिभाषिकशब्दानां सरलीकरणं विधाय छात्राः प्रशिक्षकैः प्रशिक्ष्यन्ते।

विश्वविद्यालयस्य पाठ्यक्रमेषु केचन पक्षाः प्रायोगिकाः यथा पौरोहित्यकर्मकाण्डादिकं क्रियते। एतान् सर्वान् पाठ्यक्रमान् अध्यापकाः वेदिकादिकं निर्माय प्रत्यक्षपद्धत्या अवबोधयन्ति।

वेदाङ्गेषु अनेके खलु ग्रन्थाः विशेषगूढार्थाः विद्यन्ते।

एतेषां ग्रन्थानाम् अध्यापनाय विशेषप्रकल्पाः समायोज्यन्ते। यथा ''**शास्त्रप्रौढिः**'' ''**शास्त्रव्याख्यानम्**'', व्याख्यानमाला प्रभृतयः विश्वविद्यालयद्वारा यथासमयं समायोजयन्ते।

साधाराणछात्राणाम् असाधारणछात्राणां च कृते अधिगमस्तराकलनं तत्तद्विभागीयैः अध्यापकैः क्रियते सहैव तयोः प्रश्नोत्तरद्वारा परीक्षणमपि विधीयते। एवं प्रकारेण विश्वविद्यालयस्य सर्वविभागेषु छात्राधिगमस्तरस्य आकलनं, साधारणासाधारणछात्राणां कृते विशेषकार्यक्रमाः, संस्कृतसंभाषणशिविराणि, शास्त्रप्रशिक्षणकार्यशालाप्रभृतयः वाञ्छितप्रकल्पाः समायोज्यन्ते।

सामान्यसेधा उक्तानां छात्राङ्कृते प्रातः सप्तवादनप्रभृति सार्धैष्टि वादनपर्यन्तम् अध्यापकाः स्वकीयावासे छात्रान् आहूय न्यूनतां पूरयन्ति।

सामान्यमेधासम्पत्तिमुक्तानां छात्राणां कृते पाठ्यांशगतविशेषान् अतिसंक्षिप्तरूपेण प्रथमः प्रदर्श्य ततः परं मुख्यामुख्यविभागज्ञानञ्च सम्पाद्य मेधा सम्पत्तिप्रवर्धनाय प्रयासो विधीयते। अत्र 'दर्शनसार' नामकग्रन्थाधारेण अयं प्रयासः अग्रेसार्यते।

प्रगताध्येतॠणाम् एवं सामान्याध्येतृणां च परस्परं संवादादिक स्थाप्यते येन प्रगताध्येतृणां सकाशाह सामान्याध्येतारः क्रमेण विषयान् जानीयुः।

एवं सामान्याध्येतृणाम् आत्मविश्वासवर्धनाय तेषाम् अध्ययने प्राप्त-क्लेशानां वारणाय अपेक्षिताः तत्तत्कालिकाः कार्यक्रमाः अपि सञ्चाल्यन्ते। मध्ये मध्ये च संगोष्ठ्यादिमाध्यमैः देशस्य विभिन्नविद्भिः सह एषां संवादोऽपि स्थाप्यते।